M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 894

Title: Saptaes;devatan Puja

894

[illegible]

C

		Saptārṣidevatāpuja	**Title**
			Author
			Editor
			Year, Vols.
50			**Publisher**
894			**Remarks**

मुखदुःगाघनाशायदंतानांचविशुद्धये॥ जीवनायचगात्राणांकुर्वेहं

श्रीगणेशायनमः॥ आचम्यप्राणानायम्य॥ पूर्वोक्तएवंगुणविशेषण
विशिष्टायांपुण्यतिथौममप्रथमरजनुमारभ्यशरीरावसानपर्यंतंज्ञानाज्ञा
नसकृत्कृतरजोदोषजनितनाशेषकल्मषविनाशार्थंममइहजन्मनिजन्मां
तरेचपुत्रपौत्राभिवृद्धये॰॥ सप्तऋषिदेवताप्रीत्यर्थंयथामीलितोपदे:
पूजनमहंकरिष्ये॥ ऋषे॰ अत्रि॰ एवा॰ प्रस॰ अभि॰ गणा॰ उना॰ अत्रेय
सप्तऋषयःशुभाःश्रेष्ठाःसर्वेषांचशुभप्रदाः॥ सर्वेपापव्यपोहंतुज्ञा
नतोऽज्ञानतःकृतं॥ कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगोतमः॥ ज
मदग्निर्वसिष्ठश्चसाध्वीचैवाप्यरुंधती॥ नमोब्रह्मण्यदेवायब्रह्म
णस्तेजउत्तमं॥ सूर्यकोटिप्रतीकाशंमहर्षिवृंदंविचिंतयेत्॥ इतिध्यानं

894

ऋषि०

१ आगच्छंतु महाभागाश्चतुर्वेदस्वरूपिणः॥ यावद्व्रतं महं कुर्वे कृपया भवतां प्र-
भो॥ सहस्रशीर्षेत्यावाहनं०॥ ऋग्यजुःसामवेदानां स्वरूपेभ्यो नमो नमः॥
पुराणपुरुषेभ्यश्च आसनं प्रदाम्यहं॥ पुरुष एवेदमासनं०॥ गंधपु-
ष्पाक्षतैर्युक्तं पाद्यं गृह्णंतु भो द्विजाः॥ प्रसादं कुरुते प्राज्ञास्तुष्टाः संतु स-
दा मम॥ एतावानस्येति पाद्यं०॥ नमस्ते शुक्लपंचम्यामर्चिता ऋषिस-
त्तमाः॥ दुग्धाज्यपूतं मे सर्वं गृह्णंत्वर्घ्यं मयार्पितं॥ अर्घ्यं॥ लोकानां तु-
ष्टिकर्तारो यूयं सर्वे तपोधनाः॥ नमो धर्मविधानेभ्यो महर्षिभ्यो न-
मो नमः॥ आचमनीयं०॥ मंदाकिनी गोतमी च यमुना च सरस्वती॥ ताभ्यो
जलं समानीतं स्नानार्थं प्रतिगृह्यतां॥ स्नानं०॥ सर्वे नियता तपोनिष्ठा

ब्रह्मण्याः सत्यवादिनः॥ वस्त्राणि प्रतिगृह्णंतु मुक्तिदाः संतु मे सदा॥ वस्त्रं॥
कुंकुमागरुकस्तूरीसुगंधैर्मिश्रितं शुभं॥ गंधाढ्यं चंदनं दिव्यं गृह्णंतु ऋषि-
सत्तमाः॥ गंधं०॥ रंजिताः कुंकुमाद्येन अक्षताश्च सुशोभनाः॥ गृह्णंतु मम
संतुष्टाः प्रसन्ना ऋषिसत्तमाः॥ अक्षता०॥ मालतीचंपकादीनि मालत्यादीनि
वै प्रभो॥ मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां॥ पुष्पं॥ वनस्पत्योरसो धू०॥
धूपं०॥ आज्यं त्रिवर्तिसंयुक्तं०॥ दीपं०॥ नानापक्वान्नसंयुक्तं रसैः षड्भिः स-
मन्वितं॥ नैवेद्यमक्षयः सर्वे गृह्णंतु मुक्तिदायकाः॥ नैवेद्यं०॥ पूगीफलमि-
मिति तांबूलं०॥ हिरण्यगर्भमिति हिरण्यं०॥ इदं फलं मया देवस्थापितं पु-
रतस्तव॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥ फलेन फलितं स-

ऋ॰षि॰ वैत्रैलोक्यंसचराचरं॥तस्मात्फलप्रदानेनसफलाश्चमनोरथाः॥लै॰फ॰॥
२ कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगोतमः॥जमदग्निर्वसिष्ठश्चविश्वामि
त्रोथगोतमः॥साध्वीचैवाप्यरुंधती॥मंत्रपुष्पं॥पदेपदेसापरिपूजकेभ्यः
सद्योश्वमेधादिफलंददाति॥तांसर्वपापक्षयहेतुभूतांप्रदक्षिणांवैपरितः
करोमि॥इतिप्रदक्षिणां॥नानानिकानिपुरस्फुटानियानीहकर्माणिम
याकृतानि॥क्षम्याणिचेतानिममक्षमस्वंप्रयांतुतुष्टाःपुनरागमाय॥एते
सप्तर्षयःसर्वेभक्त्यासंपूजितामया॥सर्वेपापव्यपोहंतुज्ञानतोज्ञानतःकृतं॥
इतिनमस्कारः॥ततएभिर्मंत्रैःपृथक्पृथगर्घ्याणिदापयेत्॥कश्यपःस
र्वलोकाद्यःसर्वलोकेषुसंस्थिता॥नाराणांपापनाशायऋषिरूपेणतिष्ठति॥

कश्यपाय॰इदं॥अत्रयेचनमस्तुभ्यंसर्वलोकहितैषिणे॥तपोरूपा
यसत्यायब्रह्मणेमिततेजसे॥अत्रये॰इदं॥भरद्वाजनमस्तेस्तुसदाध्या
नपरायण॥पापंजहिकलसर्वंममसर्वविनाशाय॥भरद्वा॰॥इदं॥वि
श्वामित्रनमस्तेस्तुज्वालामुखमहाजन॥प्रत्यक्षीभूतगौचीनप्रोरूपेणसंस्थि
ता॥विश्वामि॰इदं॥गोतमत्वंचभूतानांऋषीणांचमहाप्रिया॥श्रोतानां
कर्मणांचैवसंप्रदायप्रवर्त्तकः॥गोत॰॥इदं॥जमदग्नेमहातेजास्तपोम
धाग्निलोचन॥लोकेषुधर्मरक्षार्थंसर्वपापनिवर्त्तक॥जमदग्न॰इदं॰
नमस्तुभ्यंवसिष्ठायजटिलायमहात्मने॥धर्मरूपायसभ्यायलोकानां
हितकारिणे॥वसिष्ठा॰इदं॥अरुंधतीनमस्तुभ्यंसर्वपापप्रणाशनी॥

पतिव्रतानांसर्वासांधर्मशीलप्रवर्त्तके।। अरुंधत्यै०।। इदं०।। नमोऽस्तुऋषि
सप्तभ्यः सर्वेनोचिंतितप्रदाः।। पूजिताभक्तिभावेनगृहाणत्वंमयाहृतं।।
इदमर्घ्यंसमर्पयामि।। एवंसंपूज्यविधिवद्भक्तियुक्तेनचेतसा।। तेषाम
निचश्रोतव्यमिदंचैवकथानकं।। यांतुदेवगणाः सर्वेपूजामादायपा
र्थिवे।। इष्टकामप्रसिध्यर्थंपुनरागमनायच।। ।। ।। ।।
इतिपूजासमाप्तः।। छ ।। छ ।। छ ।। छ ।। छ ।।
अनेनयथाशक्तियथाज्ञानेनकृतपूजनेनअरुंधतीसहितसप्तऋ
षिदेवताभ्यः प्रीयतांनमम।।